जय शङ्कर

सर्वेभ्यः संस्कृत साधकेभ्यः नमो नमः |

गीर्वाणप्रतिष्ठया प्रस्तुतीकृतं संस्कृत पाठ्यक्रमं अधिकं सार्थकं कर्तुं अस्माकं शिक्षिकाभिः लिखिताः कथाः भवतां सम्मुखं प्रदत्तुम् अतीव मुदिता वयम् | पाठ्यक्रमे पाठितान् कानिचित् विषयान् **(नामधातु, णिजन्त, त् कारान्त शब्दाः इत्यादीन् विषयान् अधिगम्य )** विशदीकर्तुं एताः कथाः लिखिताः सन्ति |

कतिपयासु कथासु परोक्ष भूतकालस्य स्थाने वर्तमान कालः प्रयुक्तः दृश्यते| यथा महाभारत काले घटितासु कथासु| एताः कथाः मूलतः गीर्वाणप्रतिष्ठायाः पाठ्यक्रमः यैः सद्य एव प्रारब्धः तेषां कृते लिखिताः यतः तैः परोक्ष भूतकालस्य अध्ययनं न् कृतमस्ति इति मन्यामहे |

एताः कथाः, पाठ्यक्रमे पाठितान् विषयान् स्पष्टीकर्तुं उपयुक्ताः भवेरन् इति आशास्महे |

अस्माकं गुरुवर्याणां श्री चित्रापुर मठाधिपानां श्रीमत्-सद्योजात्-शङ्कराश्रम-स्वामीनां प्रेरणया प्रणीतस्य अस्य पाठ्यक्रमस्य भवद्भ्यः संस्कृत पठने सम्यक् उपयोगः भवेत् इति अस्माकं अपेक्षा |

शुभं भवतु|